No. of printed pages-
10

CLASS – X

P0ST MIDTERM EXAMINATION (2024-25)

SUBJECT - SANSKRIT

SET – B

CODE NO -119

समयः – 3HR पूर्णाङ्काः – 80 अङ्काः

निर्देशा: -

(i) अस्मिन् प्रश्नपत्रे पृष्ठानाम् संख्या 8 प्रश्नाः च 11 सन्ति। सर्वे प्रश्नाः अनिवार्या:।
(ii) प्रश्नानाम् उत्तराणि खण्डानुसारं क्रमेणैव लेखनीयानि।

प्र-1. निम्नलिखितं गद्यांशं पठित्वा तदाधारितान् प्रश्नान् संस्कृतेन उत्तरत- 10

एकदा एकः कर्तव्यपरायणः नगररक्षकः इतस्ततः भ्रमन् एकम् अशीतिवर्षीयं महापुरुषम् अपश्यत्। सः आम्रवृक्षस्य आरोपणे तल्लीनः आसीत्। इदं दृष्ट्वा नगररक्षकः तं महापुरुषम् अवदत् - अवलोकनेन प्रतीयते यत् यदा एषः वृक्षः फलिष्यति तदा भवान् जीवितः न भविष्यति। अतः किमर्थं वृया परिश्रमं कुर्वन्ति भवन्तः? महापुरुषः हसित्वा अवदत् पश्यन्तु एतान् फलयुक्तान् वृक्षान् । एतेषाम् आरोपणं मया न कृतं परं फलानि अहं खादित्वा सन्तुष्टः भवामि। अतः यदा मम आरोपितस्य वृक्षस्य फलानि अन्ये खादिष्यन्ति, अहं पुनः प्रसन्नः भविष्यामि । महापुरुषस्य वचनं श्रुत्वा तं च नमस्कृत्य नगररक्षकः उक्तवान्- अनुकरणीया एव सज्जनानां सज्जनता।

एकपदेन उत्तरत-
1X2=2

(i) नगररक्षकः कीदृशं महापुरुषम् अपश्यत्?
(ii) कः अवदत् - "अवलोकनेन प्रतीयते यत्"..... ?"

II.पूर्णवाक्येन उत्तरत- 2X2=4

(i) महापुरुषेण आरोपितस्य वृक्षस्य फलानि के खादिष्यन्ति ?
(ii) सः महापुरुषः कस्य आरोपणे तल्लीनः आसीत् ?
III. अस्य अनुच्छेदस्य कृते उपयुक्तं शीर्षकं संस्कृतेन लिखत1

IV. यथानिर्देशम् उत्तरत-(केवलम् प्रश्नत्रयम्)। 1X3=3

(i) 'नगररक्षकः' इति पदस्य विशेषणपदं किम् अस्ति ?
(क) इतस्ततः (ख) एकदा (ग) कर्तव्यपरायण (घ) परायण
(ii) अस्मिन् गद्यांशे 'व्यर्थम्' इत्यर्थे कः शब्दः प्रयुक्तः ?
(क) वृथा (ख) सफलम् (ग) निष्फलम् (घ) दुष्फलम्
(iii) 'दुर्जनानाम्' इति पदस्य कः विलोमशब्दः ?
(क) जनानाम् (ख) दुष्टानाम् (ग) सज्जनानाम् (घ) सत्सङ्.गानाम्
(iv) अस्मिन् गद्यांशे 'भविष्यामि' इति क्रियापदस्य कर्तृपदं किम् ?
(क) पुनः (ख) अहम् (ग) प्रसन्नः (घ) सन्तुष्टः

प्र-2 स्वविद्यालयस्य वार्षिकोत्सवं वर्णयन्तः मित्रं प्रति लिखिते अस्मिन् पत्रे मञ्जूषायां प्रदत्तैः उचितपदैः रिक्तस्थानानि पूरयत- 5

परीक्षाभवनम्

तिथिः.....

प्रिय (i).....

सप्रेम नमः ।

भवतः पत्रं (ii)..... । अहं स्वविद्यालयस्य (iii)..... वर्णयामि। एकमासपूर्वमेव (iv)..... सर्वे: अध्यापकाः (v)..... च कार्येषु व्यस्ताः आसन् । शिक्षानिदेशकः कार्यक्रमस्य (vi)..... आसीत् । सः (vii).....अतीव प्राशंसत् (viii).....छात्रेभ्यः च (ix)..... अयच्छत्। पितृभ्याम् नमः ।

भवतः
(x).....
...

क०ख०ग०

मञ्जूषा

योग्येभ्यः, राकेश, वार्षिकोत्सवम्, छात्राः, प्राप्तम्, कार्यक्रमम्, पारितोषिकानि, मित्रम्, मुख्यातिथिः, विद्यालयस्य

प्र-3 अधः प्रदत्तं चित्रम् दृष्ट्वा मञ्जूषायां प्रदत्तशब्दसहायतया संस्कृते पञ्च वाक्यानि लिखत- 5

अप्सरा, राजसभायाः दृश्यम्, सिंहासनम्, सर्वे, जनाः, कथयति, आश्चर्येण, पश्यन्ति, भव्यम् दृश्यम्

अथवा

निम्नलिखितं विष्यम् अधिकृत्य मञ्जूषाप्रदत्तशब्दानां साहाय्येन न्यूनातिन्यूनं पञ्चमिः संस्कृतवाक्यैः एकम् अनुच्छेदं लिखत- (1X5=5)

"दिल्ली-विश्वपुस्तकमेलकम्"

मञ्जूषा

प्रतिवर्ष्म्, प्रगतिमैदान इति स्थले, फरवरी-मार्चमासे, विविधानि पुस्तकानि, आपणिकाः, आयोज्यते, जनसम्मर्दः, विभिन्नाः प्रकोष्ठाः, पुस्तकप्रेमिणः, साहित्यिक-गोष्ठयः, भवन्ति, सांस्कृतिककार्यक्रमाः, अल्पमूल्येन।

प्र-4 अधोलिखितां कथां मञ्जूषायाः सहायतया पूरयित्वा पुनः लिखत- 1/2 X10=5

एकदा (i)..... महाराणा प्रतापः वने कैश्चिद् विश्वासपात्रैः सैनिकैः सह (ii)..... आसीत्। स्वदेशस्य रक्षायै (iii)..... तस्य बहूनि वर्षाणि व्यतीतानि । दुःखमस्ति यत् वराकस्य (iv)..... पार्श्वे सम्प्रति सेनायाः (v)..... च अभावः अस्ति। अधुना तु सः स्व-प्राणैः अपि

(vi)..... स्वतन्त्रं कारयितुम् इच्छति। अस्मिन् सङ्कटे काले तं निराशं दृष्ट्वा तस्य (vii)..... सैनिकाः अपि व्याकुलाः भवन्ति जीवनं यावत् ते तेन सह स्थातुं (viii)..... कुर्वन्ति। अस्मिन्नेव समये (ix)..... भामाशाहः अत्यधिकानि धनानि आनीय प्रतापाय अर्पयति (x)..... - रक्षणाय च प्रार्थयति ।

मञ्जूषा

देशरक्षणाय, युध्यमानस्य, भोजनसामग्रयाः, मेवाड़ाधिपतिः, स्वदेशम्, प्रतिज्ञां, देशधर्म, सङ्कटापन्ने, प्रतापस्य, सहचराः

अथवा

रिक्तस्स्थानानि पूरयित्वा अधोलिखितसंवादं पुनः लिखत-

पितामही वेदभारती देव्याः तस्याः पौत्र्या वेदिकया सह आर्य समाज विषये भूतं वार्तालापं मञ्जूषायाः सहायतया पूरयतु भवान्

वेदिका -
(i).....?
पितामही - पुत्रि! अधुना अहं रविवारस्य सत्संगाय आर्य समाज मंदिरे गच्छामि।
वेदिका - (ii).....?
पितामही- पुत्रि, तत्र प्रथमं यज्ञः भवति ततः च आध्यात्मिकं वेदाधारितं प्रवचनं भवति ।
वेदिका - (iii).....?
पितामही - तत्र सत्संगी स्त्री-पुरुषाः एव भजनं गायन्ति प्रवचनं च वेदोपदेशकाः कुर्वन्ति ।
वेदिका - पितामहि! (iv).....?
पितामही - आम् पुत्रि! यदा-कदा तत्र भजनोपदेशकाः अपि आगत्य भजनोपदेन माध्यमेन स्व-उपदेशान् कुर्वन्ति ।
वेदिका - (v)..... ?
पितामही - आम् पुत्रि! त्वमपि आगामी रविवारे मया सह तत्र चल।
वेदिका - आम्। पितामहि! अहम् अवश्यमेव तत्र चलिष्यामि।

मञ्जूषा

किं कदापि तत्र भजनोपदेशम् अपि भवति।
आर्य समाज मन्दिरे के भजनं गायन्ति प्रवचनं च कुर्वन्ति।
प्रतीयते यत् एषः वैदिकसत्संगः तु अतीव जीवनोपकारी भवति।
पितामहि! अद्य प्रातरेव भवती कुत्र गन्तुं सज्जिता अस्ति ।
तत्र रविवासरे किं किं भवति ।

प्र-5. निम्नलिखितेषु वाक्येषु रेखाङ्कितपदानां सन्धिं विच्छेदं वा कृत्वा लिखत- 4

(i) <u>विष्णवे</u> नमः ।

(ii) सत् + जनः सदैव अनुकरणीयः ।
(iii) अस्माभिः जगत् + ईशः नन्तव्यः ।
(iv) उद्यमेन + एव कार्याणि सिद्धयन्ति ।

प्र-6. स्थूलपदानां विकल्पेषु समस्तपदम् चित्वा लिखत -4

1. अवक्रता यथा चित्ते तथा वाचि भवेद् यदि ।
(क) अ वक्रता (ख) सरलता (ग) न वक्रता (घ) अव क्रता
2. अहं तु अतीव कर्तव्यपरायण:।
(क) कर्तव्य परायान: (ख) कर्म परायण (ग) कर्तव्येषु परायण: (घ) कर्तव्यम् परायन
3. सः शास्त्रपारङ्गतः अस्ति ।
(क) शास्त्रेषु पारङ्गतः (ख) शास्त्राणाम् पारङ्गत (ग) शास्त्रात् पारङ्गतः (घ) शास्त्राणी पारङ्गतः
4. 'शरीरस्य विमोक्षणम्' अस्य कृते एकम् पदम् लिखत ।
(क) शरीरविमोक्षणम् (ख) शरीरोविमोक्षणम् (ग) शरीरस्यविमोक्षणम् (घ) शरीरस्विमोक्षणम्

प्र-7 अधोलिखितवाक्येषु रेखाङ्कितपदानां प्रकृतिप्रत्ययौ संयोज्य विभज्य वा समुचितम् उत्तरं प्रदत्तविकल्पेभ्यः चित्वा लिखत।- 4

(i)ग्रीष्मकाले सूर्यस्य प्रचण्डत्वम् असह्यं भवति।
(क) प्रचण्ड+ तण्यत् (ख) प्रचण्ड+तल् (ग) प्रचण्ड+त्व (घ) प्रचण्ड+मतुप्

(ii) बकः मीनान् छलेन अधिगृह्य क्रूर + तल् भक्षयति।
(क) क्रूरता (ख) क्रूरत (ग) क्रूरतलेन (घ) क्रूरतला

(iii) वाक्पटु: धैर्यवान् मन्त्री सभायामप्यकातर: ।

(क) धैर्य+वतुप् (ख) धैर्य+वतुप (ग) धैर्य+वतु (घ) धैर्य+वान्

(iv) इत्युक्तिस्तत कृतज्ञता
(क) कृतज्ञ+ तल् (ख) कृतज्ञ+ ता (ग) क्री + तज्ञ्ता (घ) धैर्य+वान्

प्र-8 वाच्यानुसारं कोष्ठकेषु प्रदत्तपदैः रिक्तस्थानानि पूरयत- 3

(i) युष्माभिः तत्र.....।
(ii) श्रोतृभिः कथा.....।
(iii) .....लेखाः लिख्यन्ते ।

मञ्जूषा

लेखकैः ,स्थीयते, श्रूयते,

प्र 9. रामः एकः अध्यापकः अस्ति। सः कतिवादने स्वकार्याणि करोति, इति अड.आन् दृष्ट्वा संस्कृते समयं रिक्तस्थाने लिखत- 3

i. सः (5:30) ..... उत्तिष्ठति ।
ii. पश्चात् सः (6:15) ..... स्नानं करोति ।
iii. सः (6:45) ..... प्रातराशं करोति ।

प्र-10. मञ्जूषातः उचितम् अव्ययपदं चित्वा वाक्यानि पूरयत- 4

(i) त्वम् ..... उत्तिष्ठसि ? (ii) ते.....आगच्छन्ति?
(iii) मम ग्रामात्..... एका नदी अस्ति । (iv) अहं तु.....विदेशं न अगच्छम् ।

मञ्जूषा

बहिः, कुतः, कदा, कदापि,

प्र 11. निम्नवाक्येषु रेखाङ्कितपदानां संशोधनं कृत्वा पुनर्लिखत- 3

(i) तत्र वानराः अपि कूर्दति ।
(क) कूर्दतः (ख) कूर्दन्ति (ग) कूर्दसि (घ) कूर्दन्ते
(ii) एतत् दृष्ट्वा बालकाः प्रसन्नम् अभवन् ।
(क) प्रसन्ना (ख) प्रसन्ने (ग) प्रसन्नाः (घ) प्रसन्न
(iii) ते सर्वाः पुनरपि आगन्तुम् अचिन्तयन् ।
(क) सर्वम् (ख) सर्वे (ग) सर्वाणि (घ) सर्वाः

प्र-12 अधोलिखितं गद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत- 5

तस्य वचनम् श्रुत्वा अश्रद्धेयं मत्वा मदोद्धताः कपयः प्रहस्य अवदन् "भो! किमिदम् उच्यते? न वयं स्वर्गसमानोपभोगान् विहाय अटव्यां क्षार-तिक्त-कषाय-कटु-रूक्षफलानि भक्षयिष्यामः ।" तच्छ्रुत्वा साश्रुनयनो यूथपतिः सगद्गदम् उक्तवान् -"रसनास्वादलुब्धाः यूयम् अस्य सुखस्य कुपरिणामं न जानीय। अहं तु वनं गच्छामि।"
अथ अन्यस्मिन् अहनि स मेषो यावत् महानसं प्रविशति तावत् सूपकारेण अर्धज्वलितकाष्ठेन ताडितः। ऊर्णाप्रचुरः मेषः वह्निना जाज्वल्यमानशरीरः निकटस्थाम् अश्वशालां प्रविशति दाहवेदनया च भूमौ लुठति। तस्य क्षितौ प्रलुठतः तृणेषु वह्निज्वालाः समुत्थिताः ।

अ. एकपदेन उत्तरत ½ X2=1
(i) कः सगद्गद्म उक्तवान्?

(ii) वह्निज्वालाः कुत्र समुत्थिताः?
आ. पूर्णवाक्यदेन उत्तरत - 1X2=2
(i) साश्रुनयनो यूथपतिः सगद्गदं किम् उक्तवान् ?
(ii) मेषः किमर्थं भूमौ लुठति ?
इ. निर्देशानुसारम् उत्तरत- 1X2=2
(i) 'अवदन्' क्रियापदस्य कर्तृपदं किं प्रयुक्तम् ?
(ii) 'यूथपतिः' इति पदस्य किं विशेषणपदं प्रयुक्तम् ?

प्र 13. अधोलिखितं पद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत- 5
अपूर्वः कोऽपि कोशोऽयं विद्यते तव भारति।
व्ययतो वृद्धिमायाति क्षयमायाति सञ्चयात्॥
पापिनाञ्च सदा दुःखं सुखं वै पुण्यकर्मणाम्।
एवं स्थिरतरं ज्ञात्वा साधुवृत्तिं समाचरेत्॥
अ. एकपदेन उत्तरत- 1 X2=2
(i) सरस्वत्याः कोशः कीदृशः मन्यते ?
(ii) अयं कोशः कथं क्षयमायाति ?
आ. पूर्णवाक्येन उत्तरत 1X2=2
(i) भारत्याः कोशः कथं वर्धते ?
इ. निर्देशानुसारम् उत्तरत- 1X1=1
(i) 'विद्यते' क्रियापदस्य कर्तृपदं किं प्रयुक्तम्?

प्र-14 अधोलिखितं गद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत- 5
अस्मिन् प्रदेशे पञ्चाशदधिकाः नद्यः प्रवहन्ति। विपुला च अत्र वनसम्पदा। वनौषधीनां तु अयं स्रोतः एव। पुष्पाणां समृद्धिः सुगन्धिः च मनोहरः। सर्वत्र हरीतिमा। शुद्धपर्यावरणेन युक्ततस्य अस्य प्रदेशस्य केवलं प्रकृतिः एव न विविधा मनोहरा च प्रयुक्त संस्कृतिः अपि।

सर्वे - एवम् ----------

सुधाकरः - अस्य प्रदेशस्य राजधानी का ?

पर्यटनाधिकारी - 'ईटानगरम्' अस्य प्रदेशस्य राजधानी।

श्यामा - महोदय ! अत्रत्यजनजातीनां कानि प्रमुखानि आजीविका-साधनानि ?

पर्यटनाधिकारी- कृषिः शिल्पकला वनसम्पद् चैव एतेषां प्रमुखानि आजीविकासाधनानि ।

एकपदेन उत्तरत –

(क) अरुणाचले कति नद्यः प्रवहन्ति।?
(ख) 'अरुणचलप्रदेशस्य राजधानी का ?

पूर्णवाक्येन उत्तरत –

(क) अरुणाचले कानि प्रमुखानि आजीविका-साधनानि ?

निर्देशानुसारम् उत्तरत –
(क) 'राज्यस्य ' पदस्य पर्यायपदम् चित्वा लिखत ।
(ख) 'न्यूना 'पदस्य विपरीतपदम् चित्वा लिखत ।

प्र–15 रेखाङ्कितपदानि आधृत्य प्रश्ननिर्माणं कृत्वा वाक्यानि पुनः लिखत – 5
(i) राज्ञः दानशीलतां श्रुत्वा जनाः तत्र आयान्ति स्म ।
(ii) गुरुषु अवधीरणा एव विषम् ।
(iii) भीमः एकाकी एव द्रोणपुत्राय अलम् ।
(iv) पिता पुत्राय विद्याधनं यच्छति।
(v) मयूरस्य नृत्यं प्रकृतेः आराधना ।

प्र –16. अधोलिखितयोः श्लोकयोः अन्वयम् उचितैः पदैः पूरयित्वा पुनर्लिखत– 1/2x4=2
I. पिता यच्छति पुत्राय बाल्ये विद्याधनं महत् ।
पिताऽस्य किं तपस्तेपे इत्युक्तिस्तत्कृतज्ञता ॥

अन्वयः पिता (i)..... बाल्ये महत् ((ii)..... यच्छति ।
अस्य पिता किं (iii) ..... तेपे इति
(iv).....तत्कृतज्ञता ।

मञ्जूषा

उक्तिः, विद्याधनम्, पुत्राय, तपः

अथवा

मञ्जूषायाः साहाय्येन श्लोकस्य भावायें रिक्तस्यानानि पूरयित्वा पुनः लिखत–

II. काम एष क्रोध एष रजोगुणसमुद्भवः ।
महाशनो महापाप्मा विद्ध्येनमिह वैरिणम् ॥

भावार्थः – श्रीकृष्णः अर्जुनस्य शङ्कायाः समाधानं कुर्वन् वदति–महाबाहो ! तव समस्यायाः मूलकारणं एषः (i).....क्रोधश्च स्तः । इमी (ii)..... जातौ स्तः। अतः महाशनं (iii)..... एनमेव त्वम् अस्मिन् संसारे (iv)..... जानीहि ।

मञ्जूषा

शत्रुम्, रजोगुणेन, कामः, महापाप्मानम्

प्र–17. रेखाङ्कितपदानां प्रसङ्गानुसारं शुद्धम् अर्थ लिखत – 4

(i) आपदां तरणिः धैर्यम् ।
(क) नौका (ख) सूर्यः (ग) धरा (घ) नद्याः
(ii) समन्तात् वर्धमानाः अनलशिखाः आकाशं लिहन्ति ।
(क) वामतः (ख) पृष्ठतः (ग) परितः (घ) उभयतः
(iii) क्रोधात् सम्मोहः भवति ।
(क) मूर्छा (ख) नाशः (ग) सङ्गः (घ) किंकर्तव्यविमूढता
(iv) शिष्यः आचार्यात् पादम् आदत्ते ।
(क) चरणम् (ख) चतुर्थांशम् (ग) पादपः (घ) पंक्तिम्

प्र 18. अधोलिखित कथां रिक्तस्थानानि पूरयित्वा पुनः लिखत- 4
कर्मपुरनाम नगरे (i)..... नामकः एकः कुमारः अवसत् । बाल्यकाले (ii)..... सः विद्याविमुखः केनचित् चौरेण सह मिलित्वा (iii)..... संलग्नः अभवत् । एकस्मिन् दिवसे सः दुष्टबुद्धि (iv)..... सह कस्यचित् श्रेष्ठिनः गेहे चौर्यार्थ अगच्छत् । तदा तौ (v).....मार्गे क्रीडतः बालकान् अपश्यताम् । तदा तौ तान् (vi).....अवदताम्-" अये बालकाः ! कथं भवन्तः गर्तसंकुले(vii).....क्रीडन्ति ? यदि कोऽपि गर्ते पतेत् तर्हि पतेत् तर्हि (viii).....भूत्वा सः चिरं कष्टम् अनुभवेत् ।" इदं श्रुत्वा तेषु बालकेषु एकः उद्दण्डः बालकः अवदत् - "अरे! यदि एवं तर्हि कथं युवाम् अस्मात् मार्गात् चलथः । किम् इदम् उचितमस्ति ?

मञ्जूषा

प्रच्छन्नभाग्यः, नतोन्नते, विकलाङ्गः, चौरेण, दुर्व्यसनेन, बालान्, चौर्यकर्मणि, मार्गे